## अनत्यन्तगतौ क्तात्। (४/२०७६)

अत्यन्तगतिः [1]अशेषसम्बन्धः, तदभावोऽनत्यन्तगतिः। अनत्यन्तगतौ गम्यमानायां[2] क्तान्तात्[3] कन्प्रत्ययो भवति। [4]भिन्नकः। छिन्नकः। अनत्यन्तगतौ इति किम्? भिन्नम्। छिन्नम्[5]॥

## न सामिवचने। (५/२०७७)

सामिवचने [6]उपपदे क्तान्तात् कन्प्रत्ययो न भवति। सामिकृतम्। सामिभुक्तम्। वचनग्रहणं पर्यायार्थम्। अर्धकृतम्। नेमकृतम्। सामिवचने प्रतिषेधानर्थक्यम्, [7]प्रकृत्याभिहितत्वात्? एवं तर्हि [8]नैवायमनत्यन्तगतौ विहितस्य कनः प्रतिषेधः, किं तर्हि, स्वार्थिकस्य। केन पुनः [9]स्वार्थिकः कन् विहितः? [10]एतदेव ज्ञापकं [11]भवति स्वार्थे [12]कन् इति। तत्र यदेतदुच्यते, एवं [13]हि सूत्रमभिन्नतरकं भवति, एतर्हि बहुतरकं [14]व्याप्यते इत्येवमादि, [15]तदुपपन्नं भवति॥

## बृहत्या आच्छादने। (६/२०७८)

कन्ननुवर्तते, न प्रतिषेधः। बृहतीशब्दादाच्छादने वर्तमानात् स्वार्थे कन् प्रत्ययो भवति। बृहतिका[16]। आच्छादने इति किम्? बृहतीछन्दः॥

## अषडक्षाशितङ्ग्वलङ्कर्मालम्पुरुषाध्युत्तरपदात् खः। (७/२०७९)

अषडक्ष आशितङ्गु [17]अलङ्कर्म अलम्पुरुष इत्येतेभ्यः अध्युत्तरपदात् च[18] स्वार्थे खः प्रत्ययो भवति। अविद्यमानानि षडक्षीणि अस्य इति बहुव्रीहिः। [19]बहुव्रीहौ सक्थ्यक्ष्णोः (५.४.११३/८५२) इति षच्, ततः खप्रत्ययः। अषडक्षीणो मन्त्रः। यो द्वाभ्यामेव क्रियते न बहुभिः। आशिता गावोऽस्मिन्नरण्ये आशितङ्गवीनमरण्यम्। निपातनात् पूर्वपदस्य [20]मुमागमः। अकङ्कर्मन्, अलम्पुरुषः इति 'पर्यादयो ग्लानाद्यर्थे चतुर्थ्या' (वा. ९३) इति समासः। अलं कर्मणे अलङ्कर्मीणः। अलं पुरुषाय अलंपुरुषीणः। अध्युत्तरपदस्तत्पुरुषः। अधिशब्दः शौण्डादिषु पठ्यते। राजाधीनः[21]। नित्यश्चायं प्रत्ययः, [22]उत्तरत्र विभाषाग्रहणात्। अन्येऽपि [23]स्वार्थिका नित्याः प्रत्ययाः स्मर्यन्ते, [24]तमबादयः (५.३.५५/२००१) प्राक्कनः (५.३.६४/२०१९), ञ्यादयः (५.३.११२/२०६६) प्राग्वुनः (५.४.१/२०७३), आमादयः (५.४.११/२००४) प्राङ्म मयटः (५.४.२१/२०८९), बृहतीजात्यन्ताः (५.४.६/२०७८) (५.४.९/२०८१) समानान्ताश्च इति॥

---

1. अशेषेण सम्बन्धः ब.ड.ह. 2. वर्तमानात् इत्यधिकम् क. 3. प्रातिपदिकात् इत्यधिकम् क. ड. फ. ह. 4. भिन्नकं छिन्नकं ड.ह. 5. शकलम् इत्यधिकम् ड. 6. उपपदे नास्ति ह. 7. प्रकृत्यभिहितात् ड. 8. नायम् ह. 9. स्वार्थे कविधानम् क. 10. एवं तर्हि क. 11. अनुमास्यते प.मं. 12. अपि कन् अस्ति क. 13. हि नास्ति ह. 14. व्याख्यातम् ड, व्याकरणमधीतम् ग. 15. उदाहरणं इत्यधिकम् क. 16. शाटी इत्यधिकम् क. 17. अलङ्कर्मन् ड. 18. प्रातिपदिकात् इत्यधिकम् क.ड. 19. बहुव्रीहौ नास्ति क. 20. अमागमः क. 21. ब्राह्मणाधीनः इत्यधिकम् ग.ह. 22. उत्तरसूत्रे ब.क. 23. स्वार्थिकेषु ह. 24. तरबादयः ह.